CC-0 In Public Domain. Digitized by eGangotri

CC-0 In Public Domain. Digitzed by eGangotri

ॐ

ॐ श्रीगणेशाय नमः ॥ श्रीशुकः ॥ उवाच

ॐ नमः परस्मै पुरुषाय भूयसे स-
दुद्भवस्थाननिरोधलीलया ॥
गृहीतशक्तित्रितयाय देहिना-
मन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १ ॥ १२

तदेवाह त्रयोदशभिः परस्मै सर्वोत्तमाय तत्र
हेतुः भूयसे अपरिमितमहिम्ने, तद्दर्शयति
सतः प्रपंचस्य, उद्भवादिषु निमित्तभूतया
लीलातया गृहीतं ब्रह्मादिरूपेण रज आदि
शक्तित्रितयं येन तस्मै ॥ अन्तर्भवाय अन्तर्या-
मिणे अत एव सर्वान्तरत्वादनुपलक्ष्यं वर्त्म
यस्य ॥ १ ॥

CC-0 In Public Domain. Digitzed by eGangotri

भूयो नमः सद्वृजिनच्छिदेऽसतामसं
संभवायाऽखिलसत्त्वमूर्तये। पुंसां
पुनः पारमहंस्य आश्रमे व्यव
स्थितानामनुमृग्यदाशुषे॥ २/१३॥
विचित्रफलदातृत्वमनुस्मरन्प्रणमति। भूयः पु
नश्च नमः सतां धर्मवर्तिनां वृजिनच्छिदे दुःख
हंत्रे असतामधर्मशीलानामसंभवाय अनुद्भ
वहेतवे अखिलसत्त्वमूर्तये तत्तद्देवतादिरू
पेण तत्तत्फलदायेत्यर्थः समग्रसत्त्वमूर्तये
इति वा पुनरिति पूर्वोक्तोभयवैलक्षण्यमाह
पारमहंस्ये प्रत्यङ्निष्ठारूपे आश्रमे व्यवस्थि
पु. तानां पुंसामनुमृग्यमन्तर्निरसनेन पुनःपुन
१ र्मृग्यं यदात्मतत्त्वं तस्य दाशुषे दात्रे॥ १३/२ ॥

CC-0 In Public Domain. Digitzed by eGangotri

नमो नमस्तेस्त्वृषभाय सात्वतां ॥
विदूरकाष्ठाय मुहुः कुयोगिनाम् ॥
निरस्तसाम्यातिशयेन राधसा ॥ ऐश्वर्यं
स्वधामनि ब्रह्मणि रंस्यते नमः ॥ ३/१४ ॥

सात्वतां भक्तानमृषभाय पालकाय कु-
योगिनां भक्तिहीनानां विदूरा काष्ठा दि-
गपि यस्य दुर्ज्ञेयायेत्यर्थः ॥ तदेवं वैष
म्य प्रतीतावपि निर्दोषत्वायाचिंत्यमै-
श्वर्यमाह ॥ निरस्तं साम्यमतिशायश्च य-
स्य यदपेक्षया अन्यस्य साम्यमतिशा-
यश्च नास्ति तेन राधसा ऐश्वर्येण स्वधा
मणि स्वस्वरूपे ब्रह्मणि रममाणाय ॥ ३/१४ ॥

CC-0 In Public Domain. Digitzed by eGangotri

यत्कीर्तनं यत्स्मरणं यदीक्ष
णं यद्वन्दनं यच्छ्रवणं यदऽ
र्हणम् ॥ लोकस्य सद्यो वि
धुनोति कल्मषं ॥ तस्मै सुभ
द्रश्रवसे नमो नमः ॥ ४/१५ ॥

सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मर-
न्प्रणमति, यत्कीर्तनमिति द्वाभ्याम्,
अर्हणं पूजनम्, सुभद्रं मंगलं श्रवो,
यशो यस्य तस्मै ॥ ४/१५ ॥

CC-0 In Public Domain. Digitzed by eGangotri

विचक्षणाय यच्चरणोपसाद-
नात्संगं व्युदस्योभयतोऽन्तरा-
त्मनः॥ विंदन्ति हि ब्रह्मगतिं
गतक्लमास्तस्मै सुभद्रश्रव-
से नमो नमः॥ ७/१६॥

विचक्षणा विवेकिनो यस्य चरणयोरु-
पसादनादुपसत्तेर्भजनाद् अन्तरात्मनो
मनस उभयत्रेह च परत्र च संगं व्युद-
स्य निरस्य। गतक्लमाः प्रयासरहिताः

७/१६

तपस्विनो दान पराय प्राश्वि-
नो॥ मनस्विनो मन्त्रविदः सु-
मंगलाः॥ क्षेमं न विन्दन्ति वि-
नायदर्पणं॥ तस्मै सुभद्रश्र-
वसे नमो नमः॥ ६॥१७॥

भक्तिपूज्यानां सर्वसाधन वैफल्यं दर्शय-
न्नमति, तपस्विन इति, मनस्विनो योगिनः,
सुमंगलाः सदाचाराः यस्मिंस्तप आद्यर्पणं,
विना सुभद्रश्रवस इत्यस्यावृत्तिर्यप्राःश्र-
वणादेः प्राधान्यज्ञापनाय॥ ६॥१७॥

॥पु॰॥
॥३॥

CC-0 In Public Domain. Digitzed by eGangotri

किरातहूणांध्रपुलिंदपुल्कसा आभीरकंकायवनाःखसादयः येन्येच पापायदुपाश्रयाश्रयाः शुध्यन्ति तस्मैप्रभविष्णवे नमः ॥७/१८॥

भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह किरातादयोयेपापजातयोन्येचयेकर्मतः पापरूपास्तेयदुपाश्रयाभागवतास्तदाश्रयाः सन्तः शुध्यन्ति असंभावनाशंकांपरिहरति प्रभविष्णवे प्रभवनशीलायेति ॥

॥७/१८॥

स एष आत्मात्मवतामधीश्व-
रस्त्रयीमयो धर्ममयस्तपो-
मयः। गतव्यलीकैरजशंक-
रादिभिर्वितर्क्यलिंगो भग-
वान्प्रसीदताम् ॥८/१३॥

सर्वोपास्यत्वमनुस्मरन्प्रार्थयते स एष
आत्मवतां धीराणामात्मा, आत्मत्वेनोपा-
स्य इत्यर्थः। त्रयीमयत्वादिविशेषणैस्त-
न्मार्गेणोपास्यत्वं विवक्षितम्, गतव्य-
लीकैर्निष्कपटैर्भक्तैर्वितर्क्यमत्याश्च-
पु॰ र्येण वीक्षणीयं लिंगं मूर्तिर्यस्य स प्रसी-
४ दतु ॥८/१३॥

CC-0 In Public Domain. Digitzed by eGangotri

श्रियःपतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः॥ पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतांमेभगवान्सतांपतिः॥ ९/२०॥

सर्वपालकत्वमनुस्मरन्नाह श्रिय इति॥ गतिश्च सर्वापत्सु रक्षकः॥

॥९/२०॥

CC-0 In Public Domain. Digitzed by eGangotri

यदंघ्र्यनुध्यानसमाधिधौ
तयाधियानुपश्यन्तिहित
त्त्वमात्मनः वदन्तिचैतत्क
वयोयथारुचं समेमुकुंदो
भगवान्प्रसीदताम् ॥ १०/२१ ॥

ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्रीति द्वाभ्यां
यस्यांघ्र्योरनुध्यानमेव समाधिस्तेन धौ
तया शोधितया यथारुचं रुच्यनुसारेण
सगुणनिर्गुणादिभेदैः यद्वा रुक् प्रतिभा
पु० यथामतीत्यर्थः १०/२१
५

प्रचोदिता येन पुरा सरस्वती
वितन्वताऽजस्य सतीं स्मृतिं
हृदि ॥ स्वलक्षणा प्रादुरभू
त्किलास्यतः ॥ स मे ऋषी
णामृषभः प्रसीदताम् ॥ ११/२२ ॥

किंच पुराकल्पादावजस्य हृदि सतीं सृ
ष्टिविषयां स्मृतिं वितन्वता येन प्रचोदि-
ता सती सरस्वती तस्य मुखतः किल प्रादु-
र्भूता स्वानि लक्षणानि शिक्षाद्युक्तानि
यस्याः सा ऋषीणां ज्ञानप्रदानामृषभः ॥
श्रेष्ठः ॥ ११/२२ ॥

CC-0 In Public Domain. Digitzed by eGangotri

भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्मा-
य शेते यदमूषु पूरुषः भुंक्ते गुणान्
षोडश षोडशात्मकः सोऽलंकृषी-
ष्ट भगवान्वचांसि मे ॥ १२/२३ ॥

इदानीं स्ववाचं श्रोतृजनाह्लादिनीं शृंगारकरुणा-
दिपूर्णां प्रार्थयते, भूतैरिति, स मे वचांस्यलंकृ-
षीष्टालंकरोतु, अन्यस्य वचसामन्येनालंका-
रसंभवमाशंक्य, तस्यान्तर्यामितामाविष्करो-
ति, यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अ-
मुषु पूर्ष्वन्तर्यामितया शेते वसति, अत्र पुरुषस-
माख्यां प्रमाणयति, यद्यस्मात्पुरुष इति अत ए-
व य एकादशेंद्रियपंचभूतरूपान्षोडशगुणान्,
शु॰ कला भुंक्ते प्रकाशयति, पालयतीति वा, तदात्वात्मने-
६ पदमार्षम्, अत्र हेतुः यतः षोडशानामात्मा चेतयिता
स्वार्थकः, न त्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् २३ ॥

CC-0 In Public Domain. Digitzed by eGangotri

नमस्तस्मै भगवते व्यासायामिततेजसे ॥ पपुर्ज्ञानमयं सौम्या यन्मुखांबुरुहासवम् ॥ १३/२४ ॥

श्रीव्यासं नमस्करोति, नम इति, सौम्या भक्ताः यस्य मुखांबुरुहे आसवो मकरंदस्तम् ॥ १३/२४ ॥ ॐ इति श्रीभागवते द्वितीयस्कंधे श्रीशुकस्तुतिः संपूर्णम् ॥ शुभं भवतु सर्वजगताम् ॥ ॐ ॥ उत्कात ॥ ॐ ॥ ॐ ॥ ॐ ॥

CC-0 In Public Domain. Digitzed by eGangotri

CC-0 In Public Domain. Digitzed by eGangotri

CC-0 In Public Domain. Digitzed by eGangotri

CC-0 In Public Domain. Digitized by eGangotri